अध्यायः 11

# नूतनानि साम्राज्यानि राज्यानि च



**अरविन्दः नृपः सञ्जातः**

अरविन्दः स्वविद्यालये अभिनीयमाने नाटके नृपस्य भूमिकां निर्वोढुं चितः। सः चिन्तितवान् आसीत् यत् सः राजवेशं धृत्वा श्मश्रूणि अलङ्कुर्वन् विशिष्टे असिपुटके असिं विशिष्टया धारयन् चलिष्यति । क्षणं चिन्तयन्तु सः कियान् आश्चर्यचकितः स्यात् । यदा सः बोधितः यत् तेन उपविश्य वीणावादनं करणीयं भविष्यति । कवितापाठः अपि करणीयः भविष्यति । कश्चित् संगीतज्ञः नृपः? सः कः भवितुं शक्नोति ? अरविन्दः चिन्तयितुं आरब्धवान् ।

## प्रशस्तयः किं बोधयन्ति

वस्तुतः अरविन्दः गुप्तवंशस्य प्रसिद्धनृपस्य समुद्रगुप्तस्य अभिनयं कर्तुम् उद्युक्तः आसीत् । वयं समुद्रगुप्तस्य विषये इलाहाबादस्थे अशोकस्तम्भे विलिखितेन सुबृहदभिलेखेन जानीमः। एतस्य रचना समुद्रगुप्तस्य राजसभायां कविना मन्त्रिभूतेन च हरिषेणेन केनचित् काव्यरूपेण कृता आसीत्। प्रायः १७०० वर्षेभ्यः पूर्वम् इयं प्रशस्तिः इलाहबादस्य अशोकस्तम्भे उत्कीर्णा।

अयं कश्चित् विशिष्टप्रकारकः अभिलेखः अस्ति। यः प्रशस्तिः इति कथ्यते। अयं कश्चित् संस्कृतशब्दः अस्ति यस्य अर्थः प्रशंसा भवति । प्रशस्ति-लेखनस्य प्रचलनं पुराकाले अपि आसीत्। भवता दशमाध्याये गौतमीपुत्रस्य श्रीसातकर्णिनः प्रशस्तेः विषये पठितम्। परन्तु गुप्तकाले एतासां महत्वम् इतोऽपि वर्धितम्।

**समुद्रगुप्तस्य प्रशस्तिः**

आगच्छन्तु पश्यामः, समुद्रगुप्तस्य प्रशस्तिः अस्मान् किं बोधयति। कविः अत्र नृपस्य केनचित् योद्धृरूपेण अपि च युद्धजेतृरूपेण, विदुषः उत्कृष्टकविरूपेण च भूरिशः प्रशंसां कृतवान् अस्ति। किं बहुना सः ईश्वरतुल्यः इति उक्तः अस्ति।

**योद्धा समुद्रगुप्तः**

यस्य शरीरं युद्धक्षेत्रे कुठारैः परशुभिः बाणैः कुन्तैः असिभिः लोहगदाभिः तीक्ष्णबाणैः तथा च अन्यैः शताधिकैः शस्त्रैः व्रणितं सत् अपि अत्यन्तं सुन्दरं प्रतिभाति ।

तस्य विषये इदं वर्णनं भवन्तं किं ज्ञापयति ? राजानः केन प्रकारेण युद्ध्यन्ते स्म ?

प्रशस्त्यां दीर्घाणि  दीर्घाणि वाक्यानि प्रदत्तानि सन्ति । अत्र तादृशः एव कश्चित् वाक्यांशः प्रदत्तः अस्ति ।

यदि भवान् सप्तमं मानचित्रं (पृष्ठ 113) ध्यानेन पश्येत् तर्हि भवान् ज्ञास्यति यत् कश्चित् क्षेत्रं हरितरङ्गेण रञ्जितम् अस्ति । भवान् पूर्वेण समुद्रतटेन सममेव एकस्मिन् क्रमे रक्तबिन्दून् द्रक्ष्यति । तेन एव प्रकारेण कानिचन क्षेत्राणि वृन्ताकवर्णेन नीलवर्णेन च अपि वर्णितानि भविष्यन्ति ।

इदं मानचित्रम् अस्याः प्रशस्तेः प्राप्तसूचनानाम् आधारेण निर्मितम् अस्ति । हरिषेणः चतुरः विभिन्नप्रकारकान् राज्ञः प्रति समुद्रगुप्तस्य नीतीनां वर्णनं करोति ।

१. मानचित्रे हरितवर्णयुक्तक्षेत्रम् आर्यावर्त्तस्य तेषां नवानां शासकानाम् अस्ति, यान् समुद्रगुप्तः पराजित्य तेषां राज्यानि स्वस्य साम्राज्ये मेलितवान् आसीत् ।

२. तदनन्तरं दक्षिणापथस्य द्वादशशासकाः आयान्ति । एतेषु केषाञ्चित् राजधानीः दर्शयितुं मानचित्रे रक्तबिन्दवः प्रदत्ताः सन्ति । एते सर्वे पराजिताः राजानः समुद्रगुप्तस्य पुरतः समर्पणं कृतवन्तः आसन् । समुद्रगुप्तः तान् पुनः अनुशास्तुम् आज्ञापितवान् ।

३. प्रतिवेशि-राष्ट्राणाम् आन्तरिकः भागः वृन्ताकवर्णेन रञ्जितः अस्ति । एतस्मिन् असमस्य तटीयबंगालस्य नेपालस्य उत्तरपश्चिमयोः च अनेके गणाः सङ्घा वा सम्मिलिताः आसन् । (षष्ठाध्यायं स्मरन्तु) । एते समुद्रगुप्तस्य कृते उपायनानि आनयन्ति स्म । तस्य समुद्रगुप्तस्य आज्ञानां च पालनं कुर्वन्ति स्म । तथा च तस्य राजसभायाम् उपस्थिताः भवन्ति स्म ।

४. बाह्यक्षेत्रस्य शासकानां क्षेत्रं नीलवर्णेन वर्णितम् अस्ति । सम्भवतः एतत् कुषाणवंशस्य शकवंशस्य च क्षेत्रम् आसीत् । एतेषु शासकेषु श्रीलङ्कायाः शासकाः अपि आसन् । ते शासकाः समुद्रगुप्तस्य अधीनतां स्वीकृतवन्तः अपि च स्वपुत्रीणां विवाहं तेन सह कारितवन्तः ।

मानचित्रे प्रयागं (इलाहाबादस्य पुरातनं नाम) उज्जैनं पाटलिपुत्रं च अन्विष्यतु । एतानि क्षेत्राणि गुप्तशासकानां महत्त्वपूर्णकेन्द्राणि आसन् ।

आर्यावर्त्तस्य दक्षिणापथस्य च राज्यैः सह समुद्रगुप्तस्य व्यवहारे का भिन्नता आसीत् ?

किम् एतस्याः भिन्नतायाः पृष्ठे भवान् किमपि कारणं पश्यति ?





वीणावादकः राजा
समुद्रगुप्तस्य केचन गुणाः निष्केषु टङ्किताः सन्ति यथा एतयोः निष्कयोः सः वीणां वादयति ।




**वंशावलयः**

अधिकांश-प्रशस्तयः शासकानां पूर्वजानां विषये अपि बोधयन्ति । इयं प्रशस्तिः अपि समुद्रगुप्तस्य प्रपितामहस्य पितामहस्य पितुः मातुः च विषये ज्ञापयति । तस्य माता कुमारादेवी लिच्छविगणस्य राजकुमारी पिता च गुप्तवंशस्य प्रथमशासकः आसीत्, यः महाराजाधिराजसदृशम् उपाधिं धृतवान् । समुद्रगुप्तः अपि अमुम् उपाधिं धृतवान् । तस्य पितामहस्य प्रपितामहस्य च महाराजरूपेण उल्लेखः अस्ति । अनेन ऊह्यते यत् शनैः शनैः एतस्य वंशस्य महत्त्वं वर्धितम् ।

एताः उपाधीः महत्त्वदृष्ट्या अङ्लकरोतु । राजा महाराज-अधिराजः, महाराजा च इति क्रमः स्यात् ।

समुद्रगुप्तस्य विषये वयं तस्य अनन्तरकालिके शासकेभ्यः यथा तस्य पुत्रस्य चन्द्रगुप्तद्वितीयस्य वंशावल्याः अपि सूचनाः प्राप्तुं शक्नुमः । तस्य विषये

अभिलेखेभ्यः निष्केभ्यः च अपि ज्ञायते । ते पश्चिमभारते सैन्याभियाने अन्तिमं शकशासकं पराजितवन्तः । अनन्तरम् एतादृशः विश्वासः सर्वत्र जातः यत् तेषां राजसभा विद्वद्भिः पूर्णा आसीत् । कविकालिदासः खगोलशास्त्र्यार्यभट्टः च तस्य एव राजसभायाम् आस्ताम् । तेषां विषये आधिक्येन ज्ञानं द्वादशाध्याये लप्स्यते ।

### हर्षवर्धनः हर्षचरितं च

यथा गुप्तवंशस्य शासकानां विषये अभिलेखैः मुद्राभिः च ज्ञानं भवति, तेन एव प्रकारेण अन्यशासकानां विषये अपि तेषां जीवनचरित्रं पठित्वा ज्ञानं भवति । एतादृशः एव राजा हर्षवर्धनः आसीत् । सः प्रायः १४००वर्षेभ्यः पूर्वं शासनं कृतवान् । तस्य राजकविः बाणभट्टः संस्कृतेन तस्य जीवनचरित्रं हर्षचरितम् लिखितवान् । तस्मिन् ग्रन्थे हर्षवर्धनस्य वंशावलीं प्रयच्छन् तस्य सिंहासनारोहणपर्यन्तस्य वर्णनम् अपि अकरोत् । चीनदेशीयः यात्री स्वैनत्सांगः यस्य विषये भवान् दशमाध्याये पठितवान्, सः चिरकालं यावत् हर्षस्य राजसभायाम् अतिष्ठत् । सः तत्र यत्किमपि अपश्यत् । तद्विषयकं विस्तृतवर्णनम् अकरोत् ।

हर्षः स्वपितुः ज्येष्ठतमः पुत्रः न आसीत् । पितुः ज्येष्ठभ्रातुः च मृत्योः पश्चात् सः थानेसरस्य शासकः जातः । तस्य आवुत्तः कन्नौजस्य (सप्तममानचित्रम्, पृष्ठम् ११३) शासकः आसीत् । यदा बङ्गालस्य शासकः तं हतवान् तदा हर्षः कन्नौजे स्वाधिपत्यम् स्थापितवान् । एवञ्च बङ्गालस्य उपरि आक्रमणम् अकरोत् ।

मगधं बङ्गालं च विजित्य सः पूर्वस्मिन् भागे यावत् साफल्यम् अवाप्तवान्, अन्येषु स्थानेषु तथाविधं साफल्यं न अवाप्तवान् । यदा सः नर्मदानद्याः पारे गत्वा दक्कनं प्रवेष्टुं प्रयासम् अकरोत् । तदा तत्र चालुक्यनरेशः पुलकेशिन-द्वितीयः तं रुद्धवान् ।

अष्टमं मानचित्रं (पृष्ठम् १३६) पश्यतु सूचीं च करोतु यत् यदा हर्षवर्धनः (क) बङ्गालं ख) नर्मदां यावत् गतवान् स्यात् तदा वर्तमानकालस्य केभ्यः केभ्यः राज्येभ्यः भूत्वा गतवान् स्यात् ?

### पल्लवस्य चालुक्यस्य पुलकेशिनद्वितीयस्य च प्रशस्तयः

एतस्मिन् काले पल्लवः चालुक्यः च दक्षिणभारतस्य महत्वपूर्णौ राजवंशौ आस्ताम् । पल्लवानां राज्यं तेषां राजधानीकाञ्चीपुरस्य पार्श्वस्थेभ्यः स्थानेभ्यः आरभ्य कावेरीनद्याः पुलिनं यावत् प्रसृतम् असीत्, यद्यपि चालुक्यानां राज्यं कृष्णातुङ्गभद्रानद्योः मध्ये स्थितम् आसीत् ।

चालुक्यानां राजधानी ऐहोलः आसीत् । इदं कश्चित् प्रमुखं वाणिज्यकेन्द्रम् आसीत् (मानचित्रम्–७, पृष्ठम्–११३) । शनैः शनैः इदं किमपि धार्मिककेन्द्रं सञ्जातम्, यत्र अनेकानि मन्दिराणि आसन् । पल्लवाः चालुक्याः च परस्परम् अन्योऽन्येषां सीमासु

अतिक्रमणं कुर्वन्ति स्म । मुख्यरूपेण राजधानीनाम् उपरि आक्रमणं क्रियते स्म । यतो हि राजधानीरूपाणि तानि नगराणि समृद्धानि आसन् ।

पुलकेशिनद्वितीयः प्रसिद्धतमः चालुक्यराजा आसीत् । तस्य विषये वयं तस्य राजसभाकविना रविकीर्तिद्वारा रचितया प्रशस्त्या जानीमः । एतस्यां तस्य पूर्वजानां विषये विशेषतया वंशचतुष्ट्यस्य विषये ज्ञापितम् अस्ति । पुलकेशिनद्वितीयः स्वपितृव्यात् इदं राज्यं प्राप्तवान् आसीत् ।

रविकीर्तेः अनुसारं सः पूर्वपश्चिमयोः समुद्रान्तक्षेत्रयोः युद्धाभियानानि चालितवान् । एतदतिरिच्य सः हर्षस्य दक्षिणे राज्यविस्तारम् अपि रुद्धवान् । हर्षस्य अर्थः आनन्दः भवति । कवेः कथनम् अस्ति यत् एतस्य पराजयस्य पश्चात् हर्षे अधुना 'हर्षः' न आसीत् । पुल्लकेशिनद्वितीयः पल्लवराज्ञः उपरि अपि आक्रमणं कृतवान्, यः काञ्चीपुरे शरणं ग्रहीतुं बाध्यः जातः ।

परन्तु चालुक्यानां विजयः अल्पकालिकः आसीत् । यतो हि युद्धकारणात् द्वौ अपि वंशौ कालक्रमेण दुर्बलौ जातौ । अन्ततः राष्ट्रकूटैः चोलवंशीयैः च पल्लवाः चालुक्याः च पराजिताः । एतेषां विषये भवन्तः सप्तमकक्षायां पठिष्यन्ति ।

### ते अन्ये के शासकाः आसन् ये तटेषु स्वनियन्त्रणं चिकीर्षन्ति स्म ?

(दशमाध्याये पश्यतु)

### एतेषां राज्यानां प्रशासनं कथं चलति स्म ?

पूर्वेषां नृपाणाम् इव एतेषां नृपाणां कृते अपि भूमिराजस्वं महत्तमं साधनम् आसीत् ।

प्रशासनस्य प्राथमिकघट्टाः ग्रामाः भवन्ति स्म । परन्तु शनैः शनैः अनेकानि नूतनानि परिवर्तनानि अपि जातानि । राजानः आर्थिक-सामाजिक-राजशासनिक-सैन्यशक्तिमतां जनानां समर्थनं अवाप्तुं नैकान् प्रयासान् कृतवन्तः ॥ उदाहरणरूपेण –

- कानिचन महत्त्वपूर्णानि प्रशासकीयपदानि आनुवांशिकानि जातानि अर्थात् पुत्राः स्वकीयस्य पितुः पदम् अलङ्कुर्वन्ति स्म, यथा कविहरिषेणः स्वपितुः इव महादण्डनायकस्य पदम् अलङ्कुर्वन् मुख्यन्यायाधिकारी आसीत् ।
- कदाचित् एकः एव जनः अनेकेषु पदेषु कार्यं करोति स्म । यथा हरिषेणः महादण्डनायकत्वेन सह एव कुमारामात्यः अर्थात् कश्चित् महत्त्वपूर्णमन्त्री आसीत्, कश्चित् सन्धि-विग्रहिकः अर्थात् युद्धस्य शान्तिविषयाणाम् अपि मन्त्री आसीत् ।
- एतेषु जनेषु नगरश्रेष्ठी अर्थात् मुख्यवित्तकोशी नगरस्य वणिक् वा, सार्थवाहः अर्थात् वणिजां समूहस्य नेता, प्रथम-कुलिकः अर्थात् मुख्यशिल्पकारः, कायस्थानाम् अर्थात् लिपिकानां प्रधानसदृशाः जनाः च भवन्ति स्म ।

एतादृश्यः नीतयः प्रायः किञ्चिद् अंशं यावत् प्रभावशालिन्यः भवन्ति स्म परन्तु कालक्रमेण एताभिः केचन जनाः एतावन्तः अधिकाः महत्त्वशालिनः भवन्ति स्म यत् ते स्वकीयं स्वतन्त्रराज्यं स्थापयन्ति स्म।

विचिन्त्य वदतु यत् अधिकारिणां पदानि यदि आनुवांशिकानि भवेयुः तर्हि तत्र के के लाभाः काश्च हानयः भवितुं शक्नुवन्ति स्म ?

## काचित् नूतना सेना

केचन राजानः अधुना अपि पुरातननृपाः इव सुसङ्घटितसेनां स्थापयन्ति स्म। यस्यां हस्तिनः रथाः अश्वारोहिणः पदातिसैनिकाः च भवन्ति स्म, परन्तु एतैः साकं केचन सेनानायकाः अपि भवन्ति स्म, ये आवश्यकतायां सत्यां राज्ञः कृते सैन्यसाहाय्यं प्रयच्छन्ति स्म। एतेभ्यः सेनानायकेभ्यः कश्चन नियमितवेतनं न दीयते स्म। परिवर्ते एतेषु केभ्यश्चित् भूमिदानं दीयते स्म। एते दत्तभूमेः करं स्वीकुर्वन्ति स्म। येन ते अश्वानां सेनानां च पालनं कुर्वन्ति स्म। ते अनेन भूकरेण एव युद्धाय शस्त्राणां व्यवस्थाम् अपि कुर्वन्ति स्म। एतादृशाः जनाः सामन्ताः इति उच्यन्ते स्म। यत्र कुत्रापि शासकाः दुर्बलाः भवन्ति स्म, एते सामन्ताः स्वतन्त्रीभवितुं प्रयासं कुर्वन्ति स्म।

## दक्षिणेषु राज्येषु सभाः

पल्लवानाम् अभिलेखेषु अनेकासां स्थानीयसभानां चर्चा अस्ति। एतासु किमपि एकं भूस्वामिब्राह्मणानां सङ्घटनम् आसीत् यत् सभा इति उच्यते स्म। एताः सभाः उपसमितीनां माध्यमेन सेचनकार्यस्य कृषि-सम्बद्ध-कार्याणां राजमार्ग-निर्माण-कार्याणां स्थानीय-मन्दिराणां च प्रबन्धनं तथा च तेषां निरीक्षणं स्म। येषु क्षेत्रेषु भूस्वामिब्राह्मणाः न आसन्, तत्र उरनामिकायाः ग्रामसभायाः वार्ता कृता अस्ति। नगरम इति वणिजां सङ्घटनस्य नाम आसीत्। सम्भवतः एतासु सभासु धनिकानां शक्तिशालिभूस्वामिनां वणिजां च नियन्त्रणं भवति स्म। एतासु बह्व्यः स्थानीयसभाः शताब्दान् यावत् प्रबन्धनादिकार्ये आसन्।

## तस्मिन् काले सामान्यजनाः

जनसाधारणस्य जीवनस्य किंचित् दृश्यं वयं नाटकेभ्यः केभ्यश्चित् अन्येभ्यः स्रोतोभ्यः च अपि प्राप्नुमः। इदानीम् एतादृशस्य जीवनस्य कानिचन उदाहरणानि पश्यामः।

कालिदासः स्वनाटकेषु राजसभायाः जीवनचित्राङ्कनाय प्रसिद्धः अस्ति। एतेषु नाटकेषु रोचकं तथ्यम् इदम् अस्ति, यत् राजानः तात्कालिकाः ब्राह्मणाः च परस्परं

संस्कृतेन सम्भाषमाणाः दर्शिताः सन्ति अपरञ्च अन्ये जनाः महिलाः च प्राकृतभाषया भाषमाणाः दर्शिताः सन्ति । तस्य कालिदासस्य प्रसिद्धतमं नाटकम् अभिज्ञानशाकुन्तलम् अस्ति । अस्मिन् नाटके दुष्यन्तनामकस्य कस्यचित् नृपस्य शकुन्तलानामधेयायाः कस्याश्चित् युवत्याः च प्रेमकथा वर्णिता अस्ति । एतस्मिन् नाटके केनचित् निर्धनधीवरेण सह राजकर्मचारिणां दुर्व्यवहारस्य अपि चित्रणम् अस्ति ।

**कश्चित् धीवरः शकुन्तलायाः अङ्गुलीयकं प्राप्तवान्**

कश्चित् धीवरः किमपि एकं बहुमूल्यकम् अङ्गुलीयकं प्राप्तवान् । इदम् अङ्गुलीयकं राजा दुष्यन्तः शकुन्तलायै उपहारस्वरूपं दत्तवान् आसीत्, परन्तु दुर्घटनावशात् काचित् मत्स्यी तत् निगीर्णवती । यदा धीवरः अङ्गुलीयकं स्वीकृत्य प्रासादं प्राप्तवान्, तदा द्वारपालः तं चौरवत् व्यवहृतवान् । मुख्यारक्षकाधिकारी अपि तेन सह दुर्व्यवहारं कृतवान् । नृपः एतत् अङ्गुलीयकं दृष्ट्वा बहुप्रसन्नः अभवत् । सः धीवराय पारितोषिकं दत्तवान् । आरक्षकः द्वारपालः च धीवरेण सह तस्य पारितोषिकस्य किञ्चित् भागम् अपहर्तुं मद्यशालां गतवन्तौ ।

अद्य यदि कश्चित् निर्धनः किमपि प्राप्नोति आरक्षकान् च सूचयति तर्हि किं तेन सह अपि एतादृशः एव व्यवहारः भविष्यति ?

कस्यचित् प्रसिद्धजनस्य नाम वदतु, यः प्राकृतभाषया उपदिष्टवान् । अपि च कस्यचित् नृपस्य नाम वदतु यः प्राकृतभाषया स्वाभिलेखान् लेखितवान् । सप्तमाध्यायम् अष्टमाध्यायं च पश्यतु ।)

चीनतीर्थयात्री फाशिएनवर्यः तेषां जनानां दुर्गतेः अपि वर्णनं कृतवान्, यान् उच्चवर्गीयाः शक्तिशालिनः च जनाः अस्पृश्यान् मन्यन्ते स्म । तैः नगरात् बहिः स्थातव्यं भवति स्म । सः फाशिएनवर्यः लिखति- "यदि एतैः जनैः नगरं विपणिं वा प्रवेष्टव्यं भवति स्म तर्हि अन्यान् सर्वान् सूचयितुं भूमौ काष्ठप्रहाराः करणीयाः भवन्ति स्म । येन एतं ध्वनिं श्रुत्वा जनाः सावधानं भूत्वा कथमपि अस्पृश्येन सम्पर्कः मा स्यात् इति जागरूकतया आत्मनः रक्षां कुर्वन्ति स्म" ।

एकस्मिन् स्थाने बाणभट्टद्वारा गताभियानायाः नृपसेनायाः अत्यन्तं सजीवचित्रणं कृतम् अस्ति ।

### नृपस्य सेना

राजानः व्यापकमात्रया उपयोगीनि वस्तूनि गृहीत्वा यात्रां कुर्वन्ति स्म । यत्र शस्त्राणि अतिरिच्य नित्योपयोगीनि वस्तूनि यथा पात्राणि यात्रावस्तूनि (यस्मिन् सुवर्णपादासनानि अपि सम्मिलितानि आसन्) खाद्यानि पेयानि (हरिण-शश-शाकोपस्करादीनि) विभिन्नप्रकारकाणि वस्तूनि च सम्मिलितानि भवन्ति स्म । एतानि सर्वाणि वस्तूनि शकटैः उष्ट्रैः हस्तिभिः भारवाहकैः अन्यैः पशुभिः च नीयन्ते स्म । अनया विशालसेनया सह संगीतकाराः पटहान् दुन्दुभिं तूर्यादिकं च वाद्यं वादयन्तः चलन्ति स्म ।

राजसेना यस्मात् नगरात् ग्रामात् वा भूत्वा गच्छति स्म तत्रत्यैः निवासिभिः राजसेनायाः सत्कारः करणीयः भवति स्म । ते दध्नः गुडस्य पुष्पाणां च उपहारान् आनयन्ति स्म । राजसेनायां संलग्न-पशुभ्यः घासादीनि अपि यच्छन्ति स्म । ते जनाः नृपेण सह अपि मेलितुम् इच्छन्ति स्म, यतः स्वानुरोधम् अथवा काञ्चित् समस्यां नृपं ज्ञापयितुं शक्नुयुः ।

परन्तु एताः सेनाः स्वपृष्ठे विनाशस्य विध्वंसस्य च चिह्नानि त्यजन्ति स्म । प्रायः ग्राम्यजनानां पर्णकुटीरान् हस्तिनः उत्पाटयन्ति स्म, सेनायाः कोलाहलेन वणिक्समूहानां शकटेषु योजिताः वृषभाः भीत्वा पलायन्ते स्म । बाणभट्टः वर्णयति यत् – सम्पूर्णं विश्वं धूलिमग्नं भवति स्म ।

सेनया सह नीतवस्तूनां सूचीं करोतु । ग्रामवासिनः नृपाय किं किं स्वीकृत्य आगच्छन्ति स्म ?

### अन्यत्र

षष्ठे मानचित्रे (पृष्ठम् ८४-८५) अरबदेशम् अन्विष्यतु । मरुभूम्यां सत्याम् अपि अरबदेशः यातायातस्य कश्चित् महत् केन्द्रम् आसीत् । वस्तुतः अरबवणिजः नाविकाः च भारतयूरोपयोः मध्ये समुद्रिक-वाणिज्यस्य वर्धापने काञ्चित् महत्त्वपूर्णां भूमिकाम् ऊढवन्तः । अरबदेशे उष्यमाणेषु अन्यजनेषु बेदुइनजनाः आसन्, ये यायावरसमूहाः भवन्ति स्म । एते मुख्यरूपेण उष्ट्रेषु आश्रिताः भवन्ति स्म, यतो हि एषः उष्ट्रः तादृशः सामर्थ्यवान् पशुः अस्ति यः मरुभूमौ अपि स्वस्थतया स्थातुं शक्नोति । प्रायः १४०० वर्षेभ्यः पूर्वं पैगम्बरमुहम्मदः अरबदेशे इस्लामनामकस्य कस्यचित् नूतनधर्मस्य प्रारम्भं कृतवान् । ईसायीधर्मे यथा ईसामसीहः सर्वशक्तिमान् अस्ति तथैव इस्लामधर्मे अल्लाहः इति मन्यते, ईश्वरात् परं सर्वे मानवाः समानाः सन्ति । अत्र इस्लामधर्मस्य पवित्रग्रन्थस्य *कुरानस्य* कश्चित् अंशः प्रदत्तः अस्ति –

यवनानाम्, आस्थावताम्, भक्तानाम्, सत्यनिष्ठानाम्, धैर्यवतां स्थितप्रज्ञानाम्, दानिनाम्, व्रतिनाम्, पूतात्मनाम्, नित्याल्लाहोपासकानां च स्त्रीपुरुषाणां कृते अल्लाहः क्षमां पुरस्कारं च निर्धारितवान् अस्ति । गतेषु शतवर्षेषु इस्लामधर्मः उत्तरीये अफ्रीकायादेशे स्पेनदेशे ईरानदेशे भारते च प्रसृतः । अरबनाविकाः, ये पूर्वम् एव एतस्य उपमहाद्वीपस्य तटीयनिवासस्थानैः परिचिताः आसन्, अधुना आत्मना सह एतं नूतनं धर्मम् अपि आनीतवन्तः । अरबदेशस्य सैनिकाः प्रायः १३०० वर्षेभ्यः पूर्वं सिन्धप्रान्तं (वर्तमानपाकिस्तानं) विजितवन्तः ।

षष्ठे मानचित्रे तान् मार्गान् अन्विष्यतु, यैः मार्गैः नाविकाः सैनिकाः च एतम् उपमहाद्वीपम् आगतवन्तः स्युः ।

**उपयोगिशब्दाः**

प्रशस्तिः
आर्यवर्त्तः
दक्षिणापथः
वंशावली
आनुवंशिकः
पदाधिकारी
क्षेत्रपतिः
सभा
नगरम्

## कल्पयतु

हर्षवर्धनस्य सेना अग्रिमसप्ताहे भवतां ग्रामे आगमिष्यति। भवतः पितरौ एतस्याः स्वागतार्थं सज्जां कुरुतः। वर्णयतु यत् परस्परं मातापितरौ किं वदतः, सज्जार्थं च किं कुरुतः।

### आगच्छतु स्मरामः कुर्मः



1. उचितान् अनुचितान् च वदतु –
   क) हरिषेणः गौतमीपुत्रस्य श्रीसातकर्णिनः प्रशंसायां प्रशस्तिम् अलिखत्।
   ख) आर्यावर्त्तस्य शासकाः समुद्रगुप्ताय उपहारान् आनयन्ति स्म।
   ग) दक्षिणापथे द्वाद्वशशासकाः आसन्।
   घ) गुप्तशासकानां नियन्त्रणे द्वे महत्त्वपूर्णकेन्द्रे मदुरैतक्षशिले आस्ताम्।
   ङ) ऐहोलः पल्लवानां राजधानी आसीत्।
   च) दक्षिणभारते स्थानीयसभाः शताब्दान् यावत् कार्यं अकुर्वन्।

**काञ्चन महत्त्वपूर्णतिथयः**

- गुप्तवंशस्य प्रारम्भः (१७००वर्षेभ्यः पूर्वम्)
- हर्षवर्धनस्य शासनम् (१४००वर्षेभ्यः पूर्वम्)

2. एतादृशानां त्रयाणां लेखकानां नामानि ज्ञापयतु, ये हर्षवर्धनस्य विषये लिखितवन्तः।
3. एतस्मिन् युगे सैन्यसङ्घटने कानि कानि परिवर्तनानि आगतानि ?
4. भवान् एतस्य कालस्य प्रशासनिक-व्यवस्थायां कानि कानि नूतनानि वस्तूनि पश्यति।

### आगच्छन्तु चर्चां कुर्मः



5. समुद्रगुप्तस्य भूमिकां निर्वोढुम् अरविन्देन किं किं कर्तव्यं भवेत् ? एतस्मिन् विषये भवान् किम् अनुभवति ?
6. किं प्रशस्तीः पठित्वा सामान्यजनाः स्वतः अवगच्छन्तः स्युः ? सकारणम् उत्तरं वदतु।

**आगच्छन्तु कृत्वा पश्यामः**



7. यदि भवता स्ववंशावली निर्मातव्या स्यात् तर्हि भवान् तत्र केषां जनानां समावेशं करिष्यति ? भवान् कति वंशानुक्रमान् एतस्मिन् सम्मिलितान् करिष्यति ? एकां तालिकां रचयतु अपि च तां वर्णैः पूरयतु ।
8. अद्यत्वे युद्धस्य प्रभावः जनसाधारणस्य उपरि कथं भवति ?

इति एकादशोऽध्यायः